Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८२
जूलाई - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### वाणी एव सञ्जीवनी

आपत्तिः प्रत्येकं राष्ट्रं पीडयति । केवलं प्रकारेषु अन्तरं भवितुम् अर्हति । कानिचन राष्ट्राणि ज्ञानपूर्वकं प्रतिकारं कर्तुं शक्नुवन्ति । तेषां च साफल्यं भूतले अभिनन्दनीयं भवति । परन्तु भारतस्य कथा नितरां भिन्ना । अत्र तु राजनैतिकी कुटिलता, दुष्टानां वैद्यानाम् अवसरप्राप्तिः, वणिजां च आर्थिकाः स्वप्नप्रपञ्चाः अविरतं नृत्यन्ति । बहुत्र वचनस्य अविवेकिता अपि मनुष्यं मारयति । केनचित् मूर्खेण दूरवाण्या प्रेषितः कश्चित् सन्देशः रुग्णस्य हृदयस्पन्दनं विषमं करोति । 'कोरोना' रोगे रुग्णस्य मानसं स्वास्थ्यं कः रक्षिष्यति ? बुद्धिमन्तः सज्जनाः एतत् सत्कर्म कर्तुं शक्नुवन्ति ।

अहम् अनुभवेन वक्तुं शक्नोमि यत् मित्राणां वाणी बहुत्र 'सञ्जीवनी' भवति । यथा –

- भवतः शरीरम् एव अन्तिमं प्रमाणं वर्तते । शरीरस्य भाषाम् अवगन्तुं प्रयत्नं करोतु ।
- निःशुल्काः उपदेशाः सर्वत्र अटन्ति । ते सर्वे भवतः कृते निर्मिताः नापि स्युः । विवेकं पुरस्कृत्य निर्णयं करोतु ।
- विश्वसनीयाः वैद्याः अद्यापि लभ्यन्ते इति न विस्मर्तव्यम् ।
- विविधैः प्रयोगैः शरीरं न पीडयतु भवान् ।
- अनेके जनाः रोगग्रस्ताः भवन्ति इति सत्यं, किन्तु ततोऽपि अधिकाः स्वस्थाः भवन्ति इति महत् आश्वासनम् अस्ति । भवतः गणना स्वस्थेषु भवेत् ।
- महत् आश्वासनं वर्तते यत् सम्प्रति रुग्णालयेषु सम्मर्दः न्यूनः जायमानः दृश्यते । अतः उपचर्यागतं कष्टम् अपि सह्यं भविष्यति ।
- प्राणवायोः निर्माणं प्रतिदिनं वर्धते । वैदेशिकाः सज्जनाः अपि हस्तान् प्रसारयन्ति ।
- कर्मनिष्ठाः ऋषितुल्याः विज्ञानिनः अपि अहोरात्रं परिश्रमं कुर्वन्ति ।

एवम् अनुकूलाः पवनाः अभिनवं जीवनं प्रदातुं नितराम् अस्माभिः सह वर्तन्ते ।

अस्तु, पुनर्मिलामः । अये, शृण्वन्तु भोः भवन्तः ! श्रीमता कमलेशचोकसीवर्येण प्रेषितम् एतत् मिष्टान्नम् –

**विषाणुर्न भ्रमत्यत्र तं भ्रामयति मानवः ।**
**स्वभ्रमणं परित्यज्य विषाणुं ते वशं कुरु ॥**

# अजापुत्रः अहसत् अरोदीत् च



कश्चन धर्मात्मा गृहस्थः एकं यागं कर्तुम् इष्टवान्। 'स च यागः मह्यं पुण्यं सद्गतिं च दास्यति' इति तस्य विश्वासः आसीत् । यागस्य नियमः आसीत् यत् यः यागं करोति तेन कश्चन अजः बलिरूपेण अर्पणीयः एव इति।

सः गृहस्य आचार्यः आसीत् । सः स्वस्य शिष्यौ आज्ञापितवान् यत् अत्रत्यस्य धनिकस्य गृहं गत्वा एकम् अजम् आनयतां, सः धनिकः मम भूतपूर्वच्छात्रः अस्ति इति।

शिष्यौ तथैव कृतवन्तौ । ताभ्यां कश्चन अजः आनीतः। अनन्तरदिने प्रातः विविधाः यागविधयः समारब्धाः।

''अयि शिष्याः ! एतं पर्वतमूलस्थं सरोवरं नीत्वा सम्यक् स्नानं कारयित्वा आनयन्तु । ततः गन्धमाल्यादिभिः एतम् अलङ्कुर्वन्तु। तदनन्तरम् अत्र आनयन्तु'' इति शिष्यान् आदिष्टवान् आचार्यः। एवम् आदिश्य यागस्य अङ्गतया यानि अन्यानि कार्याणि करणीयानि आसन् तेषु व्यापृतः अभवत् सः।

द्वौ शिष्यौ तम् अजं सरोवरं प्रति नीतवन्तौ । अन्ये शिष्याः तौ अनुसृतवन्तः । ते अरण्ये उपलभ्यमानानि पुष्पाणि अवचित्य अजस्य निमित्तं मालां रचितवन्तः । ततः सरोवरजलेन तैः अजः स्नापितः । स्नानानन्तरं सः अजः तीरं प्रति आनीतः । यदा अजस्य कण्ठे माला स्थापिता तदा आश्चर्यकरी काचित् घटना प्रवृत्ता । स च अजः उच्चैः अहसत् ! अजस्य हासः श्रुतपूर्वः दृष्टपूर्वः वा न आसीत् केनापि। अतः सर्वे शिष्याः आश्चर्येण स्तब्धाः अभवन्। अजः तु तान् निर्निमेषदृष्ट्या पश्यन् अतिष्ठत्।

अग्रे किं करणीयम् इति अजानन्तः शिष्याः परस्परं मुखं पश्यन्तः स्थितवन्तः । तावता अपरा आश्चर्यकरी घटना घटिता। एतदवसरे अजः रोदनम् अकरोत् सशब्दम्।

तदा कश्चन शिष्यः धावन् आचार्यसमीपं गत्वा प्रवृत्तं सर्वं निवेदितवान् । 'एतस्मिन् अजे कश्चन आत्मा आविष्टः स्यात् । अतः एव अजः एवं व्यवहृतवान्' इति स्वगतं वदन् सः अचिन्तयत् – 'एतादृशः अजः यागे बलिरूपेण अर्पयितुम् अर्हः वा न वा इति न ज्ञायते मया' इति। अतः सः शिष्येण सह अजसमीपम् अगच्छत्।

अजः किञ्चित्कालम् आचार्यं तीक्ष्णदृष्ट्या अपश्यत्। ततः सः मानवस्वरेण – ''भवतः ऊहा युक्ता अस्ति आचार्य ! अहं भवादृशस्य कस्यचित् गृहस्थस्य आत्मा अस्मि, एतस्मिन् अजे आविष्टः अस्मि च । एतत् मया ऐदम्प्राथम्येन कृतं कृत्यं न । इतः पूर्वं नवनवत्युत्तरचतुश्शत (४९९) वारं मया एवं कृतम् । तन्नाम मया नवनवत्युत्तरचतुश्शतम् अजाः प्रविष्टाः इतः पूर्वम्, ये च भवादृशैः पुण्यसम्पादनेच्छुकैः बलिरूपेण समर्पिताः'' इति

उक्त्वा – ''मया अजानां शरीरं किमर्थं प्रविश्यते, किमर्थम् अजरूपेण जन्म प्राप्यते इति किं भवान् जानाति ?'' इति अपृच्छत्।

''न। भवान् एवं किमर्थं करोति इति न ज्ञायते मया'' इति अवदत् आचार्यः।

''पूर्वम् अहम् अपि भवान् इव कश्चन गृहस्थः आसम्। पुण्यप्राप्तीच्छया भवता इव मया अपि कश्चन यागः कृतः। यागे च कश्चन अजः बलिरूपेण अर्पितः। तस्य फलरूपेण मरणानन्तरं मया पञ्चशतं जन्मानि प्राप्तव्यानि अभवन्। एतत् अस्ति मम अन्तिमं जन्म। तत् स्मरता मया हसितम्'' इति अवदत् अजः।

''भवता किमर्थं हसितम् इति तु मया ज्ञातम् इदानीम्। किन्तु भवतः रोदनस्य कारणं किम् इति तु मया न ज्ञातम्'' इति अवदत् आचार्यः।

''रोदनस्य कारणं किं भवता ज्ञातव्यम् एव ? अस्तु, तदपि श्रावयामि। भवतः गतिं स्मरता मया रोदनं प्राप्तम्। मरणानन्तरं भवता अपि पञ्चशतं जन्मानि प्राप्यन्ते अजमारणहेतोः। तत् स्मरता मया रोदनं प्राप्तम्। तदस्तु, किं विलम्बेन ? यागस्थलं गच्छाम। शीघ्रातिशीघ्रं भवान् मम शिरः छिनत्तु, येन मया एतस्मात् जन्मतः मुक्तिः ततः सद्गतिः च प्राप्येत'' इति उक्त्वा गमनत्वराम् अदर्शयत् अजः।

किन्तु तावता आचार्यः बलिरूपेण तस्य अर्पणस्य चिन्तनं सर्वथा परित्यक्तवान् आसीत्।

सः अजम् अवदत् – ''मित्र! भवान् अरण्ये स्वेच्छया सञ्चारं कर्तुम् अर्हति। एषोऽहं भवन्तं स्वतन्त्रं करोमि। भवतः प्राणान् अपहर्तुं न इच्छामि अहम्'' इति।

''न। सर्वथा मास्तु एवम्। मां मारयतु कृपया। यस्मिन् अजे अहम् आविष्टः अस्मि तस्य मारणं कृतं चेत् एव अहं स्वतन्त्रः भवामि। तदा मया पुनः मानवजन्म प्राप्येत। तथा चेत् अजमारणादिकं परित्यज्य लोकोपकारकं किमपि कुर्याम्। अतः विलम्बः मास्तु इति भवन्तं सानुरोधम् अभ्यर्थये'' इति प्रार्थितवान् अजः।

''नैव। सर्वथा मया तत् न क्रियते'' इति दृढस्वरेण उक्तवान् आचार्यः।

''भवता न मार्यते चेदपि मम मरणं तु निश्चितम् एव। व्याघ्रखादनात् अन्यप्रकारेण वा अद्य मम मरणं स्यादेव'' इति अवदत् अजः।

तावता कश्चन झञ्झावातः उत्पन्नः। महान् वायुः सरोवरपरिसरे उत्पातम् अकरोत्। वृक्षाणां शाखाः भग्नाः अभवन्। आचार्यः तच्छिष्याः च आत्मरक्षणाय समीपस्थां गुहाम् आश्रितवन्तः। तेषु सर्वेषु पश्यत्सु एव काचित् तडित् स्फुरिता। तस्याः आघातं प्राप्य अजः मरणम् अवाप्नोत्।

झञ्झावातस्य अपगमस्य अनन्तरं यदा सर्वे ग्रामं प्रतिनिवर्तमानाः आसन् तदा कश्चन शिष्यः अपृच्छत् – ''आचार्य! किं यागस्य निमित्तम् अन्यः कश्चन अजः अन्वेष्टव्यः अस्माभिः ?'' इति।

''न। अहं यागे पशुबलिं दातुं न इच्छामि। पशुबलिं विना एव यागः परिसमापयिष्यते मया'' इति अवदत् आचार्यः।

# अहिंसा परमो धर्मः

डॉ. सुखेश्वरः झा

हिंसनं हिंसा = जीव-हत्या, प्राणवियोजनम् इत्यर्थः। न हिंसा अहिंसा, परमः = उत्कृष्टः - धर्मः - धारणानुकूलम् आचरणम् इत्यर्थः।

हिंसा शब्दः अतिव्यापकार्थः। न केवलं जीवहत्या एव अपितु यत् किमपि आचरणं कस्यापि मनःखेदकरं तत् सर्वं हिंसायाम् अन्तर्भवति। मनः खेदकरेण व्यवहारेण जनः समाजो वा उद्विग्नो विघटनोन्मुखो भवति इति हिंसनं वस्तुतोऽधर्मः। तदभावश्च अनुद्वेगकारित्वात्, जीवनधारणानुकूल्याय कल्पते इति अहिंसा परमो धर्मो भवति इति साधूक्तम्।

किन्तु अस्य धर्मस्य सर्वदा सर्वथा परिपालनं न कठिनम् एव अपितु असम्भवम् इत्येव कथयितुं पार्यते। ये शब्दकरण-पटवः प्राणिनः सन्ति मनुष्य-पशु -विहङ्गादयः, ते हिंस्यमानाः आर्तनादं चेक्रीयन्ते। हनन-क्रियया बहुतरं शोणितं स्रवति। अतः हिंसायाः प्रयोगः लोके बहुधा तादृशेषु सन्दर्भेषु एव क्रियमाणोऽवलोक्यते। वस्तुस्थितिस्तु वर्तते ततोऽतिभिन्ना। विश्वस्थाः सर्व एव पदार्थाः वस्तुः सजीवा एव मन्तव्याः। तरुगुल्मादयोऽपि पानीयं पोषकं रासायनिकं च सम्प्राप्य नितरां वृद्धिं गच्छन्ति। हरीतिम्ना पुष्पफलादिसमृद्धया च दृष्टिं नन्दयन्ति। छिन्नास्त एव सन्तः सद्यो म्लानतां शुष्कतां च गच्छन्ति। तेषां प्राणवत्ता आचार्येण विज्ञानिना जगदीशचन्द्रवसुना चिरं प्राक् प्रत्यायिता। कस्यापि मनोभावं ज्ञातुम् अन्तर्यामिता अमीषाम् अति प्रबला इति आधुनिका अपि विज्ञानिनः प्रमाणयन्ति। कालिदासस्य कण्वस्तु 'पातुं न प्रथमं व्यवस्यतिजलं युष्मास्वपीतेषु या' इत्येव न कथयति अपितु 'चूतेन सश्रितवर्ती नवमालिकां समर्थं ' भर्तारं दुष्यन्तम् अवाप्तां नवोढां शकुन्तलाम् इव मत्वा उभयोर्विषये वीतचिन्तो (शा. ४/१३) भवति। शूद्रकस्य चारुदत्तः 'कदाचिद् व्यथिता स्यात्' इति मत्वा पुष्पहेतोः कुसुमितां लताम् अपि नाकर्षति। (मृच्छ. ९/८) अहो ! कवीनां पदार्थप्राणवत्ता-बोधः, सूक्ष्मेक्षिका सहृदयता च ! वाल्मीकेः पर्वताः जल-प्रपातास्रमुखाः उच्छ्तैः शृङ्गैः एव बाहुभिः सीतायां ह्रियमाणायां विक्रोशन्ति (रा. २.५२.८७)। कालिदासस्य अम्बुराशिः प्रगल्भायाः नद्याः मुखं पिबति स्वकीयं च तरङ्गाधरं तां पाययते (रघु. १३/९)। भवभूतेः 'ग्रावा रोदिति वज्रस्यापि हृदयं दलति (उत्तर. १.२८)। सेयं स्थितिः पदार्थसजीवता विषयिणी। विश्वस्य प्रत्येकं पदार्थाः महाकवीनाम् एकपरिवार सदस्यभूताः।'

अस्यां स्थितौ सर्वम् अन्नपानादिकम् अहिंसामिच्छद्भिः दुष्पापम्। यत् किमपि भुज्यते भूयस्त्वेन तत्र पदार्थाः बीजरूपाः एव पुनः जन्मग्रहणसमर्थाः। विविध-प्रकारेण पाक-प्रक्रियया प्रजननशक्तिं तेषां मारयित्वैव ते भोज्याः क्रियन्ते। भोजनेन विना चेद् जीवनम् असम्भवं तदा अन्ततः शाकादीनाम् अपि उत्पाटन-कर्तन-पाकाः अनिवार्या एवेति अहिंसायाः सर्वथा पृथग्भावः असम्भव इव भाति। अत एव 'जीवो जीवस्य भक्षणम्' इत्युक्तम्। तथापि येन हिंसितेन विना अपि कार्य सम्भवति तस्य अहिंसनम् अवश्यमेव कर्तव्यम् इत्यत्रैव 'अहिंसा परमो धर्मः इत्यस्य तात्पर्यं मन्तव्यम्। वस्तुतः व्यवहारे बहुधा 'हिंसा' अपि धर्मः भवति, अथवा कर्तव्यता-गौरवात् प्राणिवधोऽपि हिंसा न मन्यते। 'वैदिकी हिंसा हिंसा न भवति' इत्यस्य तथैव अभिप्रायः प्रतिभाति, अनिवार्यकर्तव्यतायाः धर्मत्वात्। अत एव रामः 'वालिनं जघान' रावणञ्च सबान्धवं मारयामास। कृष्णः कंसम् अजीधतत्। आततायिनः बन्धून् अपि

( अनुसन्धानम् ५ पृष्ठे... )

# मासवार्ता

## आरब्धः 'Value Education through Sanskrit' इति अभ्यासक्रमः ।



बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थानेन 'Value Education through Sanskrit बालसंस्कृतवर्गः' इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ८ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः, व्यक्तित्वविकासश्च वर्धिष्यन्ते। श्रीश्यामः पटेलः, श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेल, श्रीमती माधवी झाला, श्रीपारुल व्यासः च छात्रान् पाठयिष्यन्ति। अभ्यासक्रमोऽयम् आवर्षं 'Online' प्रचलिष्यति।

### अहिंसा परमो धर्मः

हन्तुं गीताया उपदेशकः अर्जुनम् उत्साहयाञ्चकार। विस्मृत-गीतार्थस्यैव भारतस्य १९६२ तमे वर्षे चीनदेशात् पराजयः, पुनः समाहृतसैन्यबलस्य १९६५ तमे, १९७१ तमे च वर्षे पाकिस्तानेन सह आयोधने महान् जयः । अतः मशक-मत्कुण-मूषक-शत्रु-वधः न कदाप्यधर्मः इत्येव निश्चेतव्यम्। तथा च एष अहिंसा सिद्धान्तः मानवतायाः उत्कर्षस्य पराकाष्ठां स्वस्य सार्थक्याय अपेक्षते । मानवाः यावत् कालपर्यन्तम् ईर्ष्यालवः, द्वेषिणः, लोभिनः, पापाचारिणः, मात्स्यन्यायानुवर्तिनः सन्ति तावत्-काल-पर्यन्तम् अस्य व्यावहारिकता न निर्विवादा। अत एव धर्मसंस्थापनार्थाय भगवतो बुद्धस्य महात्मनो गान्धिमहोदयस्य च देशेऽपि सैन्य-व्यवस्थादिना, सति सम्भवे सर्वविध-हिंसनाय प्रस्तुतेः आयोजनम् एव धर्मः । क्लैब्यात् हिंसैव श्रेयसी मन्तव्या। बाढं सा हिंसा परिहरणीया यस्याम् अकृतायाम् अपि कर्तव्यच्युतिः न भवति। भारतीय-विलक्षण-मस्तिष्कोद्भावितस्य अस्य अत्युत्कृष्ट-सिद्धान्तस्य संसारे सर्वमानवानां कृते आदर्शभूततायां तु न कोऽपि सन्देहः। सुप्रचारितेन, सर्वैः यथासम्भवं परिपालितेन च विश्वशान्तिः सम्भवतीति अस्य महत्त्वम् अपरिमितम्। तत् किं क्रियेत जनैः ?

## कृपया हसन्तु

**शिक्षिका - (रमणं प्रति) एतस्य खगस्य पादौ दृष्ट्वा खगस्य नाम लिख।**

**रमण: - (सम्यक् दृष्ट्वा) एष: क: खग: ? इति अहं न जानामि।**

**शिक्षिका - त्वम् अनुत्तीर्ण: ..... तव नाम किम् अस्ति ?**

**रमण: - भवती अपि मम पादौ दृष्ट्वा एव जानातु मम नाम किम् ? इति।**

★ ★ ★ ★ ★

**नमन: - (मोहनं प्रति) 'Monkey' इत्यस्य संस्कृतं किम् ?**

**मोहन: - वानर:।**

**नमन: - किं भवान् पुस्तके दृष्ट्वा अवदत् ?**

**मोहन: - न, अहं भवन्तं दृष्ट्वा अवदम्।**

★ ★ ★ ★ ★

**कीदृश: काल: आगत: ? पूर्वं कोऽपि अतिथि: गृहम् आगच्छति स्म तदा गृहस्थ: वदति स्म - "भय: मास्तु। श्वानाय औषधसूचि: दत्ता अस्ति।" इदानीं कोऽपि आगच्छति तर्हि स: एव गृहस्थ: वदन् अस्ति - "भय: मास्तु। अस्माभि: औषधसूचि: स्वीकृताऽस्ति।"**

★ ★ ★ ★ ★

**पति: - (पत्नीम् उद्दिश्य) भो: प्रिये ! अहं तव कृते मम प्राणान् अपि दातुं शक्नोमि।**

**पत्नी - प्राणदानं तु अतीव सरलम्। यदि त्वयि शौर्यम् अस्ति तर्हि मया सह जीवित्वा दर्शयतु।**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**आपत्समुद्ररणवीरधिय: परेषां जाता महत्यपि कुले न भवन्ति सर्वे।**
**विन्ध्याटवीषु विरला: खलु पादपास्ते ये दन्तिदन्तमुसलोल्लिखनं सहन्ते ॥**

**तात्पर्यम्** – सर्वेऽपि आपदं सोढुं न शक्नुवन्ति, धीरा: एव आपत्काले धैर्येण कार्यं कुर्वन्ति। यथा वने गजस्य पादघातं केचन पादपा: एव सहन्ते, न सर्वे।

**आयत्यां गुणदोषज्ञ: तदात्वे क्षिप्रनिश्चय:।**
**अतीते कार्यशेषज्ञ: विपदा नाभिभूयते ॥**

**तात्पर्यम्** – अग्रे भविष्यमाणस्य कार्यस्य गुणदोषाणां ज्ञाता, वर्तमानविषये शीघ्रनिर्णयस्वीकरणे समर्थ:, कृते कार्ये अवशेषस्य ज्ञाता विपत्तौ पराजित: न भवति।

**आरभन्तेऽल्पमेवज्ञा: कामं व्यग्रा भवन्ति ते।**
**महारम्भा: कृतधिय: तिष्ठन्ति च निराकुला:।**

**तात्पर्यम्** – अज्ञानिन: अल्पं कार्यम् आरभन्ते चेदपि व्याकुला: भवन्ति। किन्तु महात्मान: महत: कार्यस्य आरम्भं कुर्वन्ति चेदपि शान्तचित्ता: सन्त: कार्याणि निर्वहन्ति।

## ज्ञानसरिता

**श्यामः पटेलः**

**वैश्विकक्रीडामहोत्सवः ''ओलिम्पिक''** –''ओलिम्पिक'' इति विश्वस्य लोमहर्षणः क्रीडामहोत्सवः प्रतियोगिता चास्ति। विश्वस्य बहुनां देशानां क्रीडकाः भागं वहन्ति। ओलिम्पिक-क्रीडामहोत्सवस्य चन्द्रकप्राप्तिः गौरवस्य विषयः भवति। एतस्य महोत्सवस्य परम्परा विश्वस्य प्राचीनतमाभ्यः परम्पराभ्यः एकतमा अस्ति। ख्रीस्ताब्दात् पूर्वे ७७६ तमे वर्षे ग्रीकदेशस्य ओलिम्पियानगरे एषः ओलिम्पिकक्रीडामहोत्सवः आरब्धः जातः। तदा तत्र केवलं धावनप्रतियोगिता एव आयोजिता आसीत्। आधुनिकसमये प्रचलतः ओलिम्पिकक्रीडामहोत्सवस्य प्रारम्भः ग्रीकदेशस्य एथेन्सनगरे ख्रीस्ताब्दस्य १८९६ तमे वर्षे सञ्जातः। तदा १४ देशानां २४५ पुरुषक्रीडकाः ४३ क्रीडासु भागं गृहीतवन्तः।

प्राचीनग्रीकदेशे अग्निः ''देवः'' इति मन्यते स्म। अतः ओलिम्पिकक्रीडायाः आरम्भः अग्निकेतुना भवति। एतम् अग्निकेतुम् ओलिम्पियानगरस्य हेरानामन्दिरस्य अग्निना प्रज्वाल्य क्रीडास्थानं प्रति आनयते स्म। द्वितीयवारम् ओलिम्पिकक्रीडामहोत्सवः ख्रीस्ताब्दस्य १९०० तमे वर्षे फ्रान्सदेशस्य पेरिसनगरे अभवत्। तस्मिन् २६ देशानां १३१९ क्रीडकाः भागम् अवहन्। तदा तत्र ७५ क्रीडानाम् आयोजनं जातमासीत्। एवञ्च प्रथमवारं १२ महिलाक्रीडकाः अपि भागं स्वीकृतवत्यः। अनन्तरं ख्रीस्ताब्दस्य १९०८ तमे वर्षे लण्डननगरे आयोजितायाम् ओलिम्पिकक्रीडायां १०० क्रीडासु २००० यावन्तः क्रीडकाः आसन्। ओलिम्पिकक्रीडामहोत्सवस्य प्रतीके नीलपीतकृष्णहरितरक्तानां वर्णानां पञ्चचक्राणि सन्ति। तानि विश्वस्य पञ्चभूखण्डानां द्योतकानि सन्ति।

लोमहर्षणः – thrilling, अग्निकेतुः – lamp, भूखण्डः – continent

## शब्दमञ्जूषा

| | |
|---|---|
| **कण्ठहारः** | necklace |
| **अमृतम्** | nectar |
| **टिप्पणम्** | note |
| **कर्गलमुद्रा** | promissory |
| **धात्री** | nurse |
| **अधिकारी** | officer |
| **व्यथा** | pain |
| **राजभवनम्** | palace |
| **तालुः** | palate |
| **पत्रकम्** | paper |
| **प्रेषणीय** | parcel |
| **क्षमा** | pardon |
| **पितरौ** | parents |
| **संसद्** | parliament |
| **शुकः** | parrot |

## किं भवन्तः जानन्ति ?

**१) महाशिवरात्रिपर्व कदा भवति?**
(क) फाल्गुनकृष्णचतुर्दश्याम् (ख) फाल्गुनकृष्णाष्टम्याम्
(ग) ज्येष्ठकृष्णाष्टम्याम् (घ) पौषकृष्णाष्टम्याम्

**२) महिलाः ऋषिपञ्चम्याः व्रतं कदा आचरन्ति?**
(क) वसन्तपञ्चम्याम् (ख) नागपञ्चम्याम्
(ग) कार्तिकशुक्लपञ्चम्याम् (घ) भाद्रपदशुक्लपञ्चम्याम्

**३) वटसावित्रीव्रतं कदा भवति?**
(क) कार्तिकपूर्णिमायाम् (ख) ज्येष्ठामावस्यायाम्
(ग) कार्तिकामावस्यायाम् (घ) ज्येष्ठपूर्णिमायाम्

**४) 'देवोत्थानी' एकादशी कदा भवति?**
(क) कार्तिकमासस्य शुक्लपक्षे (ख) मार्गशीर्षमासस्य कृष्णपक्षे
(ग) आश्विनमासस्य कृष्णपक्षे (घ) माघमासस्य शुक्लपक्षे

**५) 'मौनी-अमावस्या' इति कस्मिन् मासे भवति?**
(क) पौषमासे (ख) माघमासे (ग) फाल्गुनमासे (घ) चैत्रमासे

**६) भक्ताः सन्तोषीमातुः व्रतं कस्मिन् दिने कुर्वन्ति?**
(क) बृहस्पतिवासरे (ख) शुक्रवासरे (ग) बुधवासरे (घ) सोमवासरे

उत्तराणि – (१) क (२) घ (३) ख (४) क (५) ख (६) ख

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Learn Online**

# संस्कृतभाषाशिक्षणम्
(Level 2)

**Date :** 2/8/21 to 29/10/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 5000/-

# संस्कृतभाषाशिक्षणम्
(Level 3)

**Date :** 2/8/21 to 29/10/21
**Day :** Mon-Wed-Fri
**Time :** 7:00 am to 8:30 am (IST)
**Fees :** 6000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકીર્દિ બનાવવા માંગો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજીત

# "Diploma In Sanskrit Teaching"

## શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંર્પક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006